प्रशंसया निन्दनं प्रशंसानिन्दनम् । अत्र चतुर्व्विधषड्विधयोरविरोधः । समस्तत्वासमस्तत्वभेदानादरेण पारुष्यापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच । असमञ्जप्रलापयथार्थभाषणयोः पर्य्यायत्वान्नार्थान्तरम् । इति तिथ्यादितत्त्वम् ॥

वाङ्मयी, स्त्री, ( वाङ्मय + + ङीप् । ) सरस्वती । इति केचित् ॥

वाङ्मुखं, क्ली, ( वाचां मुखमिव । ) उपन्यासः । इत्यमरः । १ । ६ । ६ ॥

वाचंयमः, पुं, ( वाचो वाक्यात् यच्छति विरमतीति । यम उपरमे + "वाचि यमो व्रते ।" ३ । २ । ४० । इति खच् । "वाचंयमपुरन्दरौ च ।" ६ । ३ । ६९ । इति अमन्तत्वं निपात्यते ।) मुनिः । इत्यमरः । २ । ७ ।४२ ॥ मौनव्रती । इति केचिदिति भरतः ॥ ( यथा, छान्दोग्योपनिषदि । ५ । १ । ८ ।

"वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत् समृद्धं कर्म्मेति विद्यात् ।" )

वाचः, पुं, ( वाचयति गुणानिति । वच् + णिच् + अच् । ) मत्स्यविशेषः । वाचा इति भाषा ॥ ( यथा,—

"ईलिशो जितपीयूषो वाचो वाचामगोचरः ।
रोहितो नो हितः प्रोक्तो मङ्गुरो मङ्गुरः प्रियः ॥"
इत्युद्भटः ॥ )

अस्य गुणाः । स्वादुत्वम् । गुरुत्वम् । स्निग्धत्वम् । श्लेष्मलत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥

वाचकः, पुं, ( वक्ति अभिधावृत्त्या बोधयत्यर्थान् इति । वच् + ण्वुल् । ) शब्दः । यथा । शास्त्रे शब्दस्तु वाचकः । इत्यमरः ॥ द्वे वाचके । प्रकृतिप्रत्ययद्वारेणार्थस्य वाचको गवादिरूपः शास्त्रे व्याकरणे तर्कादौ च शब्द उच्यते । लोके तु संस्कृतोऽसंस्कृतः शब्द उच्यते । वक्तीति वाचकः वक्ता । इति भरतः ॥ तत्पर्य्यायः । यथा । शब्दाभिलापौ अभिधाभिधानं वाचको ध्वनिः । द्रावः कुहरितश्चेति त्रिकाण्डशेषः ॥ * ॥ (तल्लक्षणं यदुक्तं मुग्धबोधटीकायां दुर्गादासः ।

"साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः ॥*॥

वाचयतीति । वच् + णिच् + ण्वुल् ।) कथकः । पुराणादिपाठकः । यथा,—

"ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् वाचकान्नरकं व्रजेत् ॥"

तथा ।

"देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः ।
ग्रन्थिश्च शिथिलं कुर्य्याद्वाचकः कुरुनन्दन ! ।
पुनर्ब्बध्नीत तत् छत्रं न सक्ता धारयेत् क्वचित् ॥
हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः ।
दत्त्वा तु वाचकायेह श्रुतस्याप्नोति तत्फलम् ॥"

कांस्योपदोहनाः कांस्यक्रोड़ाः ।

"वाचकः पूजितो येन प्रसन्नास्तस्य देवताः ।"

तथा ।

"ज्ञात्वा पर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः ।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम् ॥"

तथा ।

"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदार्थं ग्रन्थार्थं कृत्स्नशो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थं चार्पयेन्नृप ! ।
य एवं वाचयेद्राजन् स विप्रो व्यास उच्यते ॥"

तथा ।

"सप्तस्वरसमायुक्तं काले काले विशाम्पते ।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ! ॥"
इति तिथ्यादितत्त्वम् ॥

वाचनं, क्ली, ( वच् + णिच् + ल्युट् । ) पठनम् । यथा,—

"शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ।
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम् ॥"
इति वाराहीतन्त्रम् ॥

तथा ।

"दानवाचनान्वारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात् ।" इति कात्यायनसूत्रम् ॥ ( प्रतिपादनम् । यथा, साहित्यदर्पणे १० परिच्छेदे ।

"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ॥" )

वाचनकं, क्ली, ( वाचनेन कायतीति । कै + कः ।) प्रहेलिका । इति हारावली ।१ ५९ ॥

वाचसाम्पतिः, पुं, (वाचसां सर्व्वविद्यारूपवाक्यानां पतिः । अभिधानात् षष्ठ्या अलुक ।) बृहस्पतिः । इति शब्दरत्नावली ॥

वाचस्पतिः, पुं, ( वाचः पतिः । "षष्ठ्याः पतिपुत्रेति ।" ८।३।५३ । इति षष्ठीविसर्गस्य सः । ) बृहस्पतिः । इत्यमरः । १ । ३ । २४ ॥ ( यथा, कुमारे । २ । ३० ।

"वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥"

शब्दप्रतिपालके, त्रि । यथा, ऋग्वेदे । १० । १६६ । ३ ।

"वाचस्पते निषेधेमान्यथा मदधरं वदान् ॥"

"हे वाचस्पते वाचः शब्दस्य पालयितर्देव ॥" इति तद्भाष्ये सायनः ॥ )

वाचा, स्त्री, ( वच् + भागुरिमते टाप् । ) वाक् । इति त्रिकाण्डशेषः ॥ (यथा, कातन्त्रे ।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
टापञ्चापि हलन्तानां यथा वाचा निशा दिशा ॥"

यथा च, पञ्चतन्त्रे । ४ । ४८ । "तत् श्रुत्वा ब्राह्मणेन शुचीभूय तिसृभिर्वाचाभिः स्वजीवितार्हं दत्तौ ।")

वाचाटः, त्रि, (कुत्सितं बहु भाषते इति । वाच् + "आलजाटचौ बहुभाषिणि ।"५ । २ । १२५ । इति आटच् ।) वाचालः । इत्यमरः ।३।१।३६॥ ( यथा, मनुः । ३ । ८ ।

"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥")

वाचालः, त्रि, ( बहु कुत्सितं भाषते इति । वाच् + "आलजाटचौ बहुभाषिणि ।" ५।२।१२५ । इति आलच् ।) बहुकुत्सितभाषी । तत्पर्य्यायः । जल्पाकः २ वाचाटः ३ । इत्यमरः ॥ सुबहुभाषिण्यपि जल्पाकादयस्त्रयो वर्त्तन्ते वाचाटो वाचालो जल्पाकः सुबहुभाषी स्यादिति श्लोकार्द्धपर्य्याये बोपालितः । नित्यप्रगल्भवाचालामुपतिष्ठे सरस्वतीम् । इति मुरारिरिति तट्टीकायां भरतः ॥ ( यथा, कथासरित्सागरे । ४० । ३४ ।

"वाचालैः कलहः क्लीवैश्चपलाहङ्कृताभि- नाम ॥")

वाचिकं, त्रि, ( वाच् + ठक् । ) वाचा कृतम् । यथा,—

"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

अपि च ।

"कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम् ।
एकत्वर्प्पेन तत् सर्व्वं प्रणश्यति ममाग्रतः ॥"
इति शाम्बपुराणे सूर्य्यस्तोत्रम् ॥

अन्यच्च । कायिकं मानसञ्च नमस्कारं हित्वा आचार्य्येण कथं वाचिको नमस्कारः कृतः । इति मुग्धबोधटीकायां दुर्गादासः ॥ ( वागेव । वाक् + "वाचो व्याहृतार्थायाम् ।" ५ । ४ ।३५ । इति ठक् । सन्देशोक्तौ, क्ली । इति हारावली । १६६ ॥ यथा, राजतरङ्गिण्याम् । ६ । ३५ ।

"भृत्यमेकं वणिग्वेषं प्राहिणोद्दत्तवाचिकम् ॥")

वाचिकः, पुं, ( वाचा निष्पन्नः । वाच् + ठक् । ) वाक्यारम्भः । यथा,—

"आलापश्च विलापश्च संलापश्च प्रलापकः ।
अनुलापोऽपलापश्च सन्देशश्चातिदेशकः ॥
अपदेशोपदेशौ च निर्द्देशो व्यपदेशकः ।
कीर्त्तिता वचनारम्भाद्द्वादशामी मनीषिभिः ॥"
इत्युज्ज्वलनीलमणिः ॥

वाचिकपत्रं, क्ली, ( वाचिकस्य सन्देशस्य पत्रम् ।) लिपिः । संवादपत्रम् । इति केचित् ॥

वाचिकहारकः, पुं, ( वाचिकस्य सन्देशस्य हारकः । ) लेखनम् । इति त्रिकाण्डशेषः ॥ ( दूतः । इति व्युत्पत्तिलब्धोऽर्थः ॥)

वाचोयुक्तिः, त्रि, (वाचि वाक्ये युक्तिर्यस्य ।) वाग्मी । इत्यमरटीकायां रामाश्रमः ॥ ( स्त्री, वाचो वचसो युक्तिः । "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु ।" ६ । ३ । २१ । इत्यस्य वार्त्तिकोक्त्या षष्ठ्या अलुक् । वाग्दर्शितन्यायः ॥ )

वाचोयुक्तिपटुः, त्रि, ( वाचोयुक्तौ वाक्प्रदर्शितन्याये पटुः । ) वाग्मी । इत्यमरः । ३ । १ । ३ ॥